श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ नवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ नवतितमः सर्गः ॥

## इन्द्रजिल्लक्ष्मणयोर्घोरं युद्धमिन्द्रजितो वधश्च

स हताश्वो महातेजा भूमौ तिष्ठन् निशाचरः।
इन्द्रजित् परमक्रुद्धः सम्प्रजज्वाल तेजसा ॥ **6.90.1** ॥

तौ धन्विनौ जिघांसन्तावन्योन्यमिषुभिर्भृशम्।
विजयेनाभिनिष्क्रान्तौ वने गजवृषाविव ॥ **6.90.2** ॥

निबर्हयन्तश्चान्योन्यं ते राक्षसवनौकसः।
भर्तारं न जहुर्युद्धे सम्पतन्तस्ततस्ततः ॥ **6.90.3** ॥

ततस्तान् राक्षसान् सर्वान् हर्षयन् रावणात्मजः।
स्तुन्वानो हर्षमाणश्च इदं वचनमब्रवीत् ॥ **6.90.4** ॥

तमसा बहुलेनेमाः संसक्ताः सर्वतो दिशः।
नेह विज्ञायते स्वो वा परो वा राक्षसोत्तमाः ॥ **6.90.5** ॥

धृष्टं भवन्तो युध्यन्तु हरीणां मोहनाय वै।
अहं तु रथमास्थाय आगमिष्यामि संयुगे ॥ **6.90.6** ॥

तथा भवन्तः कुर्वन्तु यथेमे हि वनौकसः।
न युध्येयुर्महात्मानः प्रविष्टे नगरं मयि ॥ **6.90.7** ॥

इत्युक्त्वा रावणसुतो वञ्चयित्वा वनौकसः।
प्रविवेश पुरीं लङ्कां रथहेतोरमित्रहा ॥ **6.90.8** ॥

स रथं भूषयित्वाथ रुचिरं हेमभूषितम्।
प्रासासिशरसंयुक्तं युक्तं परमवाजिभिः ॥ **6.90.9** ॥

अधिष्ठितं हयज्ञेन सूतेनाप्तोपदेशिना।
आरुरोह महातेजा रावणिः समितिञ्जयः ॥ **6.90.10** ॥

स राक्षसगणैर्मुख्यैर्वृतो मन्दोदरीसुतः।
निर्ययौ नगराद् वीरः कृतान्तबलचोदितः ॥ **6.90.11** ॥

सोऽभिनिष्क्रम्य नगरादिन्द्रजित् परमौजसा।
अभ्ययाज्जवनैरश्वैर्लक्ष्मणं सविभीषणम् ॥ **6.90.12** ॥

ततो रथस्थमालोक्य सौमित्री रावणात्मजम्।
वानराश्च महावीर्या राक्षसश्च विभीषणः ॥ **6.90.13** ॥

विस्मयं परमं जग्मुर्लाघवात् तस्य धीमतः।
रावणिश्चापि सङ्क्रुद्धो रणे वानरयूथपान् ॥ **6.90.14** ॥

पातयामास बाणौघैः शतशोऽथ सहस्रशः।
स मण्डलीकृतधनू रावणिः समितिञ्जयः ॥ **6.90.15** ॥

हरीनभ्यहनत् क्रुद्धः परं लाघवमास्थितः।
ते वध्यमाना हरयो नाराचैर्भीमविक्रमाः ॥ **6.90.16** ॥

सौमित्रिं शरणं प्राप्ताः प्रजापतिमिव प्रजाः।
ततः समरकोपेन ज्वलितो रघुनन्दनः।
चिच्छेद कार्मुकं तस्य दर्शयन् पाणिलाघवम् ॥ **6.90.17** ॥

सोऽन्यत्कार्मुकमादाय सज्यं चक्रे त्वरन्निव।
तदप्यस्य त्रिभिर्बाणैर्लक्ष्मणो निरकृन्तत ॥ **6.90.18** ॥

अथैनं छिन्नधन्वानमाशीविषविषोपमैः।
विव्याधोरसि सौमित्री रावणिं पञ्चभिः शरैः ॥ **6.90.19** ॥

ते तस्य कायं निर्भिद्य महाकार्मुकनिःसृताः।
निपेतुर्धरणीं बाणा रक्ता इव महोरगाः ॥ **6.90.20** ॥

स च्छिन्नधन्वा रुधिरं वमन् वक्त्रेण रावणिः।
जग्राह कार्मुकश्रेष्ठं दृढज्यं बलवत्तरम् ॥ **6.90.21** ॥

स लक्ष्मणं समुद्दिश्य परं लाघवमास्थितः।
ववर्ष शरवर्षाणि वर्षाणीव पुरन्दरः ॥ **6.90.22** ॥

मुक्तमिन्द्रजिता तत्तु शरवर्षमरिन्दमः।
आवारयदसम्भ्रान्तो लक्ष्मणः सुदुरासदम् ॥ **6.90.23** ॥

सन्दर्शयामास तदा रावणिं रघुनन्दनः।
असम्भ्रान्तो महातेजास्तदद्भुतमिवाभवत् ॥ **6.90.24** ॥

ततस्तान् राक्षसान् सर्वांस्त्रिभिरेकैकमाहवे।
अविध्यत् परमक्रुद्धः शीघ्रास्त्रं सम्प्रदर्शयन्।
राक्षसेन्द्रसुतं चापि बाणौघैः समताडयत् ॥ **6.90.25** ॥

सोऽतिविद्धो बलवता शत्रुणा शत्रुघातिना।
असक्तं प्रेषयामास लक्ष्मणाय बहूञ्शरान् ॥ **6.90.26** ॥

तानप्राप्ताञ्शितैर्बाणैश्चिच्छेद परवीरहा।
सारथेरस्य च रणे रथिनो रथसत्तमः ॥ **6.90.27** ॥

शिरो जहार धर्मात्मा भल्लेनानतपर्वणा।
असूतास्ते हयास्तत्र रथमूहुरविक्लवाः॥ **6.90.28** ॥

मण्डलान्यभिधावन्ति तदद्भुतमिवाभवत्।
अमर्षवशमापन्नः सौमित्रिर्दृढविक्रमः॥ **6.90.29** ॥

प्रत्यविध्यद्धयांस्तस्य शरैर्वित्रासयन् रणे।
अमर्षमाणस्तत्कर्म रावणस्य सुतो रणे॥ **6.90.30** ॥

विव्याध दशभिर्बाणैः सौमित्रिं तममर्षणम्।
ते तस्य वज्रप्रतिमाः शराः सर्पविषोपमाः।
विलयं जग्मुरागत्य कवचं काञ्चनप्रभम्॥ **6.90.31** ॥

अभेद्यकवचं मत्वा लक्ष्मणं रावणात्मजः।
ललाटे लक्ष्मणं बाणैः सुपुङ्खैस्त्रिभिरिन्द्रजित्॥ **6.90.32** ॥

अविध्यत् परमक्रुद्धः शीघ्रमस्त्रं प्रदर्शयन्।
तैः पृषत्कैर्ललाटस्थैः शुशुभे रघुनन्दनः॥ **6.90.33** ॥

रणाग्रे समरश्लाघी त्रिशृङ्ग इव पर्वतः।
स तथाप्यर्दितो बाणै राक्षसेन तदा मृधे॥ **6.90.34** ॥

तमाशु प्रतिविव्याध लक्ष्मणः पञ्चभिः शरैः।
विकृष्येन्द्रजितो युद्धे वदने शुभकुण्डले॥ **6.90.35** ॥

लक्ष्मणेन्द्रजितौ वीरौ महाबलशरासनौ।
अन्योन्यं जघ्नतुर्वीरौ विशिखैर्भीमविक्रमौ॥ **6.90.36** ॥

ततः शोणितदिग्धाङ्गौ लक्ष्मणेन्द्रजितावुभौ।
रणे तौ रेजतुर्वीरौ पुष्पिताविव किंशुकौ॥ **6.90.37** ॥

तौ परस्परमभ्येत्य सर्वगात्रेषु धन्विनौ।
घोरैर्विव्यधतुर्बाणैः कृतभावावुभौ जये॥ **6.90.38** ॥

ततः समरकोपेन संयुतो रावणात्मजः।
विभीषणं त्रिभिर्बाणैर्विव्याध वदने शुभे॥ **6.90.39** ॥

अयोमुखैस्त्रिभिर्विद्ध्वा राक्षसेन्द्रं विभीषणम्।
एकैकेनाभिविव्याध तान् सर्वान् हरियूथपान्॥ **6.90.40** ॥

तस्मै दृढतरं क्रुद्धो जघान गदया हयान्।
विभीषणो महातेजा रावणेः स दुरात्मनः॥ **6.90.41** ॥

स हताश्वादवप्लुत्य रथान्निहतसारथेः।
अथ शक्तिं महातेजाः पितृव्याय मुमोच ह॥ **6.90.42** ॥

तामापतन्तीं सम्प्रेक्ष्य सुमित्रानन्दवर्धनः।
चिच्छेद निशितैर्बाणैर्दशधापातयद् भुवि॥ **6.90.43** ॥

तस्मै दृढधनुः क्रुद्धो हताश्वाय विभीषणः।
वज्रस्पर्शसमान् पञ्च ससर्जोरसि मार्गणान्॥ **6.90.44** ॥

ते तस्य कायं भित्त्वा तु रुक्मपुङ्खा निमित्तगाः।
बभूवुर्लोहितादिग्धा रक्ता इव महोरगाः॥ **6.90.45** ॥

स पितृव्यस्य सङ्क्रुद्ध इन्द्रजिच्छरमाददे।
उत्तमं रक्षसां मध्ये यमदत्तं महाबलः॥ **6.90.46** ॥

तं समीक्ष्य महातेजा महेषुं तेन संहितम्।
लक्ष्मणोऽप्याददे बाणमन्यद् भीमपराक्रमः॥ **6.90.47** ॥

कुबेरेण स्वयं स्वप्ने यद् दत्तममितात्मना।
दुर्जयं दुर्विषह्यं च सेन्द्रैरपि सुरासुरैः॥ **6.90.48** ॥

तयोस्तु धनुषी श्रेष्ठे बाहुभिः परिघोपमैः।
विकृष्यमाणे बलवत् क्रौञ्चाविव चुकूजतुः ॥ **6.90.49** ॥

ताभ्यां तु धनुषि श्रेष्ठे संहितौ सायकोत्तमौ।
विकृष्यमाणौ वीराभ्यां भृशं जज्वलतुः श्रिया ॥ **6.90.50** ॥

तौ भासयन्तावाकाशं धनुर्भ्यां विशिखौ च्युतौ।
मुखेन मुखमाहत्य सन्निपेततुरोजसा ॥ **6.90.51** ॥

सन्निपातस्तयोश्चासीच्छरयोर्घोररूपयोः।
सधूमविस्फुलिङ्गश्च तज्जोऽग्निर्दारुणोऽभवत् ॥ **6.90.52** ॥

तौ महाग्रहसङ्काशावन्योन्यं सन्निपत्य च।
सङ्ग्रामे शतधा यातौ मेदिन्यां चैव पेततुः ॥ **6.90.53** ॥

शरौ प्रतिहतौ दृष्ट्वा तावुभौ रणमूर्धनि।
व्रीडितौ जातरोषौ च लक्ष्मणेन्द्रजितौ तदा ॥ **6.90.54** ॥

सुसंरब्धस्तु सौमित्रिरस्त्रं वारुणमाददे।
रौद्रं महेन्द्रजिद् युद्धेऽप्यसृजद् युधि निष्ठितः ॥ **6.90.55** ॥

तेन तद्विहितं शस्त्रं वारुणं परमाद्भुतम्।
ततः क्रुद्धो महातेजा इन्द्रजित् समितिञ्जयः।
आग्नेयं सन्दधे दीप्तं स लोकं सङ्क्षिपन्निव ॥ **6.90.56** ॥

सौरेणास्त्रेण तद् वीरो लक्ष्मणः पर्यवारयत्।
अस्त्रं निवारितं दृष्ट्वा रावणिः क्रोधमूर्च्छितः ॥ **6.90.57** ॥

आददे निशितं बाणमासुरं शत्रुदारणम्।
तस्माच्चापाद् विनिष्पेतुर्भास्वराः कूटमुद्गराः ॥ **6.90.58** ॥

शूलानि च भुशुण्ड्यश्च गदाः खड्गाः परश्वधाः।
तद् दृष्ट्वा लक्ष्मणः सङ्ख्ये घोरमस्त्रमथासुरम् ॥ **6.90.59** ॥

अवार्यं सर्वभूतानां सर्वशस्त्रविदारणम्।
माहेश्वरेण द्युतिमांस्तदस्त्रं प्रत्यवारयत् ॥ **6.90.60** ॥

तयोः समभवद् युद्धमद्भुतं रोमहर्षणम्।
गगनस्थानि भूतानि लक्ष्मणं पर्यवारयन् ॥ **6.90.61** ॥

भैरवाभिरुते भीमे युद्धे वानररक्षसाम्।
भूतैर्बहुभिराकाशं विस्मितैरावृतं बभौ ॥ **6.90.62** ॥

ऋषयः पितरो देवा गन्धर्वगरुडोरगाः।
शतक्रतुं पुरस्कृत्य ररक्षुर्लक्ष्मणं रणे ॥ **6.90.63** ॥

अथान्यं मार्गणश्रेष्ठं सन्दधे राघवानुजः।
हुताशनसमस्पर्शं रावणात्मजदारणम् ॥ **6.90.64** ॥

सुपत्रमनुवृत्ताङ्गं सुपर्वाणं सुसंस्थितम्।
सुवर्णविकृतं वीरः शरीरान्तकरं शरम् ॥ **6.90.65** ॥

दुरावारं दुर्विषहं राक्षसानां भयावहम्।
आशीविषविषप्रख्यं देवसङ्घैः समर्चितम् ॥ **6.90.66** ॥

येन शक्रो महातेजा दानवानजयत् प्रभुः।
पुरा देवासुरे युद्धे वीर्यवान् हरिवाहनः ॥ **6.90.67** ॥

अथैन्द्रमस्त्रं सौमित्रिः संयुगेष्वपराजितम्।
शरश्रेष्ठं धनुश्रेष्ठे विकर्षन्निदमब्रवीत् ॥ **6.90.68** ॥

लक्ष्मीवान् लक्ष्मणो वाक्यमर्थसाधकमात्मनः।
धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि।
पौरुषे चाप्रतिद्वन्द्वस्तदैनं जहि रावणिम्॥ **6.90.69** ॥

इत्युक्त्वा बाणमाकर्णं विकृष्य तमजिह्मगम्।
लक्ष्मणः समरे वीरः ससर्जेन्द्रजितं प्रति।
ऐन्द्रास्त्रेण समायुज्य लक्ष्मणः परवीरहा॥ **6.90.70** ॥

तच्छिरः सशिरस्त्राणं श्रीमज्ज्वलितकुण्डलम्।
प्रमथ्येन्द्रजितः कायात् पातयामास भूतले॥ **6.90.71** ॥

तद् राक्षसतनूजस्य भिन्नस्कन्धं शिरो महत्।
तपनीयनिभं भूमौ ददृशे रुधिरोक्षितम्॥ **6.90.72** ॥

हतः स निपपाताथ धरण्यां रावणात्मजः।
कवची सशिरस्त्राणो विप्रविद्धशरासनः॥ **6.90.73** ॥

चुक्रुशुस्ते ततः सर्वे वानराः सविभीषणाः।
हृष्यन्ते निहते तस्मिन् देवा वृत्रवधे यथा॥ **6.90.74** ॥

अथान्तरिक्षे देवानामृषीणां च महात्मनाम्।
जज्ञेऽथ जयसन्नादो गन्धर्वाप्सरसामपि॥ **6.90.75** ॥

पतितं समभिज्ञाय राक्षसी सा महाचमूः।
वध्यमाना दिशो भेजे हरिभिर्जितकाशिभिः॥ **6.90.76** ॥

वानरैर्वध्यमानास्ते शस्त्राण्युत्सृज्य राक्षसाः।
लङ्कामभिमुखाः सस्रुर्भ्रष्टसंज्ञाः प्रधाविताः॥ **6.90.77** ॥

दुद्रुवुर्बहुधा भीता राक्षसाः शतशो दिशः।
त्यक्त्वा प्रहरणान् सर्वे पट्टिशासिपरश्वधान्॥ **6.90.78** ॥

केचिल्लङ्कां परित्रस्ताः प्रविष्टा वानरार्दिताः।
समुद्रे पतिताः केचित् केचित् पर्वतमाश्रिताः॥ **6.90.79**॥

हतमिन्द्रजितं दृष्ट्वा शयानं च रणक्षितौ।
राक्षसानां सहस्रेषु न कश्चित् प्रत्यदृश्यत॥ **6.90.80**॥

यथास्तं गत आदित्ये नावतिष्ठन्ति रश्मयः।
तथा तस्मिन् निपतिते राक्षसास्ते गता दिशः॥ **6.90.81**॥

शान्तरश्मिरिवादित्यो निर्वाण इव पावकः।
बभूव स महाबाहुर्व्यपास्तगतजीवितः॥ **6.90.82**॥

प्रशान्तपीडाबहुलो विनष्टारिः प्रहर्षवान्।
बभूव लोकः पतिते राक्षसेन्द्रसुते तदा॥ **6.90.83**॥

हर्षं च शक्रो भगवान् सह सर्वैर्महर्षिभिः।
जगाम निहते तस्मिन् राक्षसे पापकर्मणि॥ **6.90.84**॥

आकाशे चापि देवानां शुश्रुवे दुन्दुभिस्वनः।
नृत्यद्भिरप्सरोभिश्च गन्धर्वैश्च महात्मभिः॥ **6.90.85**॥

ववर्षुः पुष्पवर्षाणि तदद्भुतमिवाभवत्।
प्रशशाम हते तस्मिन् राक्षसे क्रूरकर्मणि॥ **6.90.86**॥

शुद्धा आपो नभश्चैव जहृषुर्देवदानवाः।
आजग्मुः पतिते तस्मिन् सर्वलोकभयावहे॥ **6.90.87**॥

ऊचुश्च सहितास्तुष्टा देवगन्धर्वदानवाः।
विज्वराः शान्तकलुषा ब्राह्मणा विचरन्त्विति॥ **6.90.88**॥

ततोऽभ्यनन्दन् संहृष्टाः समरे हरियूथपाः।
तमप्रतिबलं दृष्ट्वा हतं नैर्ऋतपुङ्गवम्॥ **6.90.89**॥

विभीषणो हनूमांश्च जाम्बवांश्चर्क्षयूथपः।
विजयेनाभिनन्दन्तस्तुष्टुवुश्चापि लक्ष्मणम् ॥ **6.90.90** ॥

क्ष्वेडन्तश्च प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः।
लब्धलक्षा रघुसुतं परिवार्योपतस्थिरे ॥ **6.90.91** ॥

लाङ्गूलानि प्रविध्यन्तः स्फोटयन्तश्च वानराः।
लक्ष्मणो जयतीत्येव वाक्यं विश्रावयंस्तदा ॥ **6.90.92** ॥

अन्योन्यं च समाश्लिष्य हरयो हृष्टमानसाः।
चक्रुरुच्चावचगुणा राघवाश्रयसत्कथाः ॥ **6.90.93** ॥

तदसुकरमथाभिवीक्ष्य हृष्टाः
प्रियसुहृदो युधि लक्ष्मणस्य कर्म।
परममुपलभन्मनःप्रहर्षं
विनिहतमिन्द्ररिपुं निशम्य देवाः ॥ **6.90.94** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे नवतितमः सर्गः ॥